## विभाषा परावराभ्याम्। (२९/१९७९)

[1]परावरशब्दाभ्यां विभाषा अतसुच् प्रत्ययो भवति [2]अस्तातेरर्थे। परतो वसति। परत आगतः। परतो रमणीयम्। परस्ताद् वसति। परस्तादागतः। परस्ताद् रमणीयम्। अवरतो वसति। [3]अवरत आगतः। अवरतो रमणीयम्। अवरस्ताद् वसति। अवरस्तादागतः। अवरस्ताद् रमणीयम्॥

## अञ्चेर्लुक्। (३०/१९८०)

अञ्चत्यन्तेभ्यो दिक्शब्देभ्य उत्तरस्यास्तातिप्रत्ययस्य लुग् भवति। प्राच्यां दिशि वसति। 'लुक् तद्धितलुकि' (१.२.४९/१४०८) इति स्त्रीप्रत्ययोऽपि निवर्तते। प्राग् वसति। प्रागागतः। प्राग्रमणीयम्। प्रत्यग् वसति। प्रत्यगागतः। प्रत्यग् रमणीयम्॥

## उपर्युपरिष्टात्। (३१/१९८१)

उपरि उपरिष्टात् इत्येतौ [4]शब्दौ निपात्येते अस्तातेरर्थे। [5]ऊर्ध्वस्य उपभावः [6]रिल्रिष्टातिलौ च प्रत्ययौ निपात्येते। ऊर्ध्वायां दिशि वसति उपरि वसति। उपर्यागतः। उपरि रमणीयम्। उपरिष्टाद् वसति। उपरिष्टादागतः। उपरिष्टाद् रमणीयम्॥

## पश्चात्। (३२/१९८२)

पश्चाद् इत्ययं शब्दो निपात्यतेऽस्तातेरर्थे। [7]अपरस्य पश्चभावः आतिश्च प्रत्ययः (म.भा.२.४०९)। [8]अपरस्यां दिशि वसति पश्चाद्दिशि वसति[9]। पश्चादागतः। पश्चाद् रमणीयम्।

[६०७] दिक्पूर्वपदस्या[10]परस्य पश्चभावो वक्तव्य आतिश्च प्रत्ययः। (म.भा.२.४०९)
दक्षिणपश्चात्। उत्तरपश्चात्।

[६०८] अर्धोत्तरपदस्य दिक्पूर्वस्य पश्चभावो वक्तव्यः। (म.भा.२.४०९)
दक्षिणपश्चार्धः। उत्तरपश्चार्धः।

[६०९] विनाऽपि पूर्वपदेन पश्चभावो वक्तव्यः। (म.भा.२.४०९)
पश्चार्धः॥

## पश्च पश्चा च छन्दसि। (३३/३६०१)

पश्चपश्चाशब्दौ निपात्येते छन्दसि विषये अस्तातेरर्थे। चकारात् पश्चादपि भवति। [11]अपरस्य पश्चभावोऽकाराकारौ च प्रत्ययौ निपात्येते। [12]पुरा व्याघ्रो [13]जायते पश्च सिंहः। पश्चा सिंहः। पश्चात् सिंहः॥

---

1. सप्तमीपञ्चमीप्रथमान्ताभ्यां दिग्देशकालेषु वर्तमानाभ्यां इत्यधिकम् क. 2. अस्तातेरपवादः पक्षे सोऽपि भवति इत्यधिकम् क. 3. अवरतः – अवरस्ताद् रमणीयम् नास्ति ङ. 4. शब्दौ नास्ति क. 5. ऊर्ध्वशब्दस्य क. 6. रिरिष्टातिलौ ब. क. ह. 7. अवरशब्दस्य क. 8. अवरस्यां क. 9. पश्चाद् वसति इत्यधिकम् क. फ. 10. अवरस्य क. फ. 11. अवरशब्दस्य क. 12. परो व्याप्तो जायते प्रा. भा. चौ. 13 अपजायते ब. ड. फ.